Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 5 | ISSN : 2581- 6306

# पण्डितशिवसागरत्रिपाठिमहोदयस्य सारस्वतकृतय: लेखनानि च

**कमलिनीमहारणा,**

**शोधच्छात्रा, साहित्यविभाग:, राष्ट्रियसंस्कृतविश्वविद्यालय:, तिरुपति:**

**Article Info**
Volume 5, Issue 5
Page Number : 01-08

**Publication Issue :**
September-October-2022
**Article History**
Accepted : 01 Sep 2022
Published : 05 Sep 2022

**शोधसारांश:-** प्रो.शिवसागरत्रिपाठिमहोदयै: "संस्कृत काव्य कल्लोलिनी", "आचार्य विद्यासागर ग्रन्थावली परिशीलन", "श्रीरामचन्द्रायणे सुन्दरकाण्डम्", "आचार्यप्रज्ञा", "पूजापद्धति:", "वीर काव्यों में उपलब्ध निर्वचनों का अध्ययन", "संवीक्षा", "ललितायनम्" (अभिनन्दग्रन्थ:), "भीष्मावतार सन्त सैन चरित", "स्वातन्त्र्यपञ्चाशिका", "सुबोधपूजापद्धति:", इत्यादीनां पत्रिकाणां ग्रन्थानाञ्च रचयितृरूपेण प्रसिद्धोऽस्ति । एतेषु सर्वेषु अपि ग्रन्थेषु काव्येषु वा "भ्रष्टाचारसप्तशती" इति काव्यस्य समीक्षा अस्य शोधप्रबन्धस्य प्रमुखं लक्ष्यं भवति । अस्य विशिष्टतया कथावस्तुन: परिचय: अग्रिमाध्यायेषु क्रियते ।

**कूटशब्दा: –**प्रो.शिवसागरत्रिपाठिमहोदय:, ललितायनम् संवीक्षा, काव्यम्, पण्डित:।

डॉ. शिवसागरत्रिपाठी संस्कृतसाहित्यस्य मूर्धन्यभूत: पण्डित: आसीत् । संस्कृतसंस्कृत्यो: साधकोऽसौ पितृ–पितामहयो: संस्कारेण प्रेरित: संस्कृतजीवनशैल्या एव जीवित: । त्रिपाठिवर्योऽयं बहुमुखप्रतिभाया: अधिकारी आसीत् । वेद – साहित्य – धर्म – दर्शन – ज्योतिष – आयुर्वेद – धर्मशास्त्र – व्याकरण – जैनदर्शन –श्रमणसंस्कृतीनामपुरि तेषामनवद्यपाण्डित्यमासीत् । महोदयोऽयं स्वलेखन्या महाकाव्य–नाटक–कथासाहित्य–शतककाव्य–निर्वचनकोषै: तथा अनेकै: समीक्षात्मकै: ग्रन्थै: अर्वाचीनसंस्कृत–साहित्यपरिसरं विस्तारितं कृतवान् । असौ राजस्थानसंस्कृताकादमीद्वारा प्रकाशितस्य नवोन्मेषपुस्तकस्य सम्पादक: आसीत् । कवेरस्य कृतिषु – प्राणाहुति:, नाट्यकल्प:, भ्रष्टाचारसप्तशती, भ्रष्टायनम्, भ्रष्टताशतकम्, स्वातन्त्र्यस्वर्णजयन्तीशतकम्, आधुनिकालापशतकम्, मानवताशतकम्, प्रकीर्णशतकम् इत्यादीनि काव्यानि भारतीयपरम्पराया: पोषकत्वेन विराजन्ते । एतेषां केषाञ्चन कृतीनां सामान्यविवरणमत्र प्रस्तूयते ।

(1) प्राणाहुति: – कश्मीरस्य गौरवगाथामाधारीकृत्य राष्ट्रियैकतामखण्डतां च पोषयितुं कविना प्रणीतं सानुवादसंस्कृतनाटकं भवति "प्राणाहुति:" । भारतविभाजनसमये कश्मीरे आतङ्कवादिनां सीमप्रवेश:, कश्मीरयुवकस्य श्रीमीरमकबूलशेरवानीवर्यस्य बलिदानम्, बारतीयसेनाया: अजेयपराक्रम: अस्मिन् नाटके हृदयभेदकतया प्रतिपाद्यते । नाटकमिदं राष्ट्रभक्ते: तथा युवकानां प्राणोत्सर्गस्य भावनाया: प्रोत्साहकं भवति । भाषा अतीव सरला मार्जिता च वर्तते । नाटकमिदं 1977 तमे ख्रीष्टाब्दे प्रकाशितम् । कथावस्त्वत्र ऐतिहासिकं भवति । स्वतन्त्रभारते देशस्य सर्वेषामपि राज्ञां कृते स्वातन्त्र्यं दत्तमासीत् यत् ते स्वराज्यस्य सञ्चालनं स्वयं कुर्वन्तु अथवा सङ्घराज्यै: मिलित्वा प्रशासनं कुर्वन्तु इति । तस्मिन्नेव समये पाकिस्तानस्य सैनिका: कश्मीरं नेतुम् आक्रमणं चक्रु: । तेन दु:खित: तत्रत्य: शासक: भारतीयसङ्घेषु आत्मन: विलयं चकार । तत: भारतीयसैनिका: वायुवेगेन गत्वा पाक्सैनिकैस्सह युद्धं कृत्वा पराजितवन्त: तथा च कश्मीरवास्तव्यान् अरक्षन् । किन्तु भारतीयसेनाप्रयाणकाले यानि त्रीणि चत्वारि वा दिनानि व्यतीतानि तस्मिन्नेव समये

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

पाकिस्तानसैनिकाः श्रीनगरं प्रति गत्वा तत्र ताण्डवं चक्रुः । तस्मिन् समये यः योद्धा जनानां संरक्षणार्थमग्रे आगत्य प्राणाहूतिं दत्तवान् सः भवति कश्मीरीयुवकः, देशभक्तः, नेता श्रीमीरमकबूलशेरवानी । तस्यैव चरित्रमाधारीकृत्य नाटकमिदं प्रणीतम् । वीररसप्रधानेऽस्मिन् नाटके प्रधानरूपेण मीरमकभुलस्य अप्रतिहतशौर्यस्य अत्यन्तं सजीवं मर्मस्पर्शिचित्रणं क्रियते ।

नाटकेऽस्मिन् शारदागीतिकायाः अनन्तरं एकाङ्किकायाः प्रारम्भो भवति । सूत्रधार–नट्योः वार्तालापप्रसङ्गे प्रकृतिविभपरिपूर्णायाः वीरभूमेः कश्मीरस्य परिचयः प्रदीयते । यथा –

श्लाघ्यं हि भूमितिलकं किल भारतं नः
काष्ठा हिमाद्रिसहिता धनदस्य यत्र ।
द्राक्षाद्यनेकफल–केसर–संयुगा सा
कश्मीरभूस्सुदयिता भुवि या प्रशस्ता ।।1

एवं कश्मीरस्य नैकानि वैशिष्ट्यानि एकाङ्किकायामत्र वर्णितानि । अत्र कश्मीरस्य वीराणामपि प्रशंसात्मिका वर्णना क्रियते । यथा –

शूरा अजेयबलभारसमन्वितेषु
देशाभिरक्षक–निशाचर–भक्षकेषु ।
श्रेष्ठाः स्वकर्मसु रताः कुशला हिताया–
सूनां पणन्त इह दुर्गविपत्तिकाले ।।2

कविरत्र रूपके विश्वबन्धुत्वस्य तथा विश्वशान्तेः वार्तां ददाति । अत्र अन्ताराष्ट्रियभावनायाः परिपक्वता दृश्यते । यथा –

नरीनर्तुं साम्यं निखिललोकमध्ये,
स्वतन्त्रा भवन्तु प्रवरमानवाः यै ।
नयं मित्रतां प्रेम सुमतिं गृहीत्वा,
शुभं मानवं राज्यमनघं प्रसार्यम् ।।3

अत्र सर्वधर्मसमन्वयस्य भावना वर्ण्यते । यथा –

नेस्लामधर्मो न च यीशुधर्मो
न हिन्दुधर्मो ह्यपरो न कोऽपि ।
मया गृहीतो जनताहितार्थं
मनुष्यधर्मस्सुकरो विशालः ।।4

एवं प्रकारेण कवेः प्राणाहुतिरिति एकाङ्किका राष्ट्रियचेतनायाः वीरगाथायाः बलिष्ठमुदाहरणं भवति । अत्र "शिवम्" इति नूतनच्छन्दोऽवतारः दृश्यते । आधुनिकसंस्कृतनाटक, अर्वाचीन संस्कृत में राष्ट्रीय भावना, स्वातन्त्र्योत्तर रूपक साहित्य, सर्वगन्धा, सागरिका इत्यादिषु अस्य नाटकस्योपरि समीक्षात्मकाः शोधलेखाः प्रकाशितास्सन्ति । अपि च राजस्थानविश्वविद्यालयसंस्कृतपाठ्यक्रमे अन्यत्र च बहुषु शिक्षानुष्ठानेषु पाठ्यक्रमे एतत् संयोजितमासीत् । मातृशरणप्रकाशन, ए–65, जनता कालोनी, आदर्श नगर, जयपुर इति संस्थातः रूपकमिदं प्रकाशितमासीत् ।

(2) नाट्यकल्पः – आचार्यशिवप्रसदत्रिपाठिनः कृतिषु अयं ग्रन्थः "नाट्यकल्पः" चतुर्णां संस्कृतैकाङ्किकानां संग्रहात्मकोऽस्ति । यथा – (1) पद्मिनीरत्नम् (2) इदं न मम (3) शरणशरणम् तथा (4) हुतात्मसौहार्दम् इति ।

"पद्मिनीरत्नम्" इति नाम्न्याम् अस्याम् एकाङ्किकायां राजस्थानस्य प्रसिद्धवीरभूमेः चित्तौड़गढस्य राज्ञः रत्नसिंहस्य तथा तत्पत्न्याः रूपवत्याः पद्मिन्याः इतिहासप्रसिद्धकथा वर्ण्यते । रूपकमिदं वीररसप्रधानं भवति । मातृभूमेः सुरक्षार्थं युवकान् सर्वदा प्रेरयति । संस्कृतवाङ्मये यथा प्रतिमानाटके सीता, मृच्छकटिके आर्या धूता, वासवदत्तायां वासवदत्ता, इत्यादयः स्त्रियः कविभिः त्यागमुर्त्तित्वेन चित्रिताः तथैव श्रीशिवसागरत्रिपाठिमहोदयः राजमहिष्याः पद्मिन्याः अलौकिकत्यागं रूपकेऽस्मिन् उपस्थापयति । अनिन्द्यसुन्दरी पद्मिनी रूपकस्यास्य प्रधाननायिका भवति । अस्याः रूपलावण्यं कविना त्रिपाठिना सुष्ठु अत्रोपन्यस्तम् । तात्कालिकसमाजस्य पुरुषाणां परस्त्रीकातरता कामुकता च अत्र वर्ण्यते । पतेः रत्नसिंहस्य अभिन्नः मित्रमेव कपटं कृत्वा राजमहिष्याः दर्शनार्थं प्रासादं प्रत्यागच्छति । किन्तु राज्ञा अवमानितः विद्वेषकारणात् मुस्लिमशासकशरणं गत्वा राजमहिष्याः रूपलोलुपतां प्रदर्श्य प्रोत्साहयति । पद्मिन्याः रूपवर्णनया प्रभावितः मुस्लिमशासकः सन्धिप्रस्तावं प्रेषयति यत् असौ एकवारं दर्पणे पद्मिन्याः मुखं द्रष्टुमिच्छति, अन्यथा युद्धं भवेदिति । राजमहिषी प्रस्तावं तिरस्करोति । परवर्त्तिकाले राजा छलेन बन्दीभवति । सभासद्वर्गः पद्मिनीं मुस्लिमशासकस्य समीपे गन्तुं निवेदयन्ति । तेन पद्मिनी कुपिता जायते । अग्नौ प्रविश्य प्राणाहुतिं दत्तवती । किन्तु मुस्लिमशासकस्य समीपं न गतवती । एषा भारतीयनारीणां सतीत्वपरम्परा काव्येऽस्मिन् प्रतिफलिताऽस्ति ।

"इदं न मम" इत्येकाङ्किकात्मकं रूपकं नीतिमूलकं भवति । यज्ञे आहुतिप्रदानसमये यजमानः "देवाय स्वाहा इदं न मम" इति मन्त्रोच्चारणं करोति । अनेन स्वार्थत्यागस्य बलिदानस्य च उपदेशः प्रदीयते । अनेन रूपकेण कविः "आचार्य"नामकचरित्रमाध्यमेन जनेभ्यः स्वार्थपरायणतायाः दूरे स्थातुं तथा परोपकारितायाः त्यागपूतजीवनस्य च ग्रहणं कर्त्तुं, दिव्यविभूतीनां शरणापन्नत्वं भवितुं शिक्षां ददाति । अत्र कथावस्तु काल्पनिकी अस्ति ।

"शरणशरणम्" इति एकाङ्किकायां श्येनरूपधारी इन्द्रदेवः, श्येनाद्भीतः इति अभिनयशीलः कपोतरूपधारी धर्मराजः, तथा कपोतं श्येनाद्रक्षितुम् आत्मविसर्जनकारी महाराजः शिविश्चेति अत्र चित्रितानि पात्राणि भवन्ति । पुराणात् शिव्युपाख्यानमाधारीकृत्य रचितमिदं रूपकं प्रजारक्षणं राज्ञः प्रधानधर्मः इत्युपदेशं प्रयच्छति ।

"हुतात्मसौहार्दम्" इति संस्कृतभाषया रचितेयमेकाङ्किका पाकिस्तानसैनिकानां कश्मीरोपरि आक्रमणप्रसङ्गमाधारीकृत्य रचिताऽस्ति । अत्र महतः भारतभक्तस्य मीरमकबूलशेरवानी इति संग्रामिणः वीरगाथा प्रस्तूयते । कदाचित् "प्राणाहुतिः" इत्येकाङ्किकायाः एतन्नामान्तरं स्यात् ।

एवं प्रकारेण प्रोफेसर शिवसागरत्रिपाठिमहोदयस्य चतसृभिः एकाङ्किकाभिः गुम्फितोऽयं नाट्यकल्पः कथावस्तु, चरित्रचित्रणम्, भावपक्षः, कलापक्षः, शास्त्रीयविषयः इत्यादिदृष्ट्या स्वयंसम्पूर्णः प्रशंसनीयश्चास्ति । अत्र पारम्परिकाधुनिकनाट्यशास्त्रीयतत्त्वानां मणिकाञ्चनसंयोगः दृश्यते ।

(3) छन्दश्शाकुन्तलम् – महाकवेः कालिदास्य प्रसिद्धम् "अभिज्ञानशाकुन्तलम्" इति नाटके प्रयुक्तानां छन्दसां गवेषणात्मकव्याख्यानग्रन्थोऽस्ति "छन्दश्शाकुन्तलम्" इति । एतच्छन्दश्शास्त्रसम्मतम् । अत्र छन्दोवैविध्यं तथा भावगतौचित्यं विव्रीयते । ग्रन्थस्य प्रथमभागे छन्दसां सामान्यविवेचनं तथा छन्दश्शास्त्रेतिहासः प्रतिपाद्यते । द्वितीये अभिज्ञानशाकुन्तले व्यवहृतानां छन्दसां लक्षणम् उदाहरणैस्सह व्याख्याते । तृतीये नाटकस्य प्रमुखश्लोकानां गणपरिगणेन साकं छन्दसः नाम तथा ससन्दर्भानुवादः प्रस्तूयते । राजस्थानस्य बी.ए.पाठ्यक्रमे 1978 तमे ख्राीष्टाब्दे ग्रन्तोऽयं पाठ्यपुस्तकरूपेण निर्धारितः आसीत् । इण्डिआ बुक् हाउस्, जयपुरम् इति संस्थया अयं प्रकाशितः ।

(4) निर्वचनकोषः – अयं कोषग्रन्थः मूलतः रामायण-महाभारत-पुराणगतानां एकादशाधिकैकशतोत्तरसहस्र-संख्याकानां निर्वचनानां सोद्धरण-ससन्दर्भ-सङ्कलनात्मकोऽस्ति । रचनेयं कोश-भाषाशास्त्र-धर्म-विज्ञान-इतिहास-पुरातत्त्व-समाजशास्त्रादिविविधक्षेत्रेषु पाठकानां कृते विशेषतः अनुसन्धातृणां कृते अत्यन्तमुपादेया भवति ।

इतिहासपुरुष-पुराणपुरुषयोः कल्पितचित्रैस्साकं ग्रन्थोऽयं द्रष्टुमतीव मनोहरः वर्तते । प्रारम्भे, अस्मदीयम्,प्रस्ताना, द्योतनिका, कोशविज्ञानम्, निर्वचनपरकाः अर्थाः, स्वरूपम्, इतिहासः इत्यादयः नैके विषया प्रतिपादिताः । अत्र देव-देवयोनि-मानव- स्थल- जल- सृष्टि- तीर्थ- वनस्पति- जन्तु- अन्तरिक्ष- पुराण-साहित्य-काव्यशास्त्र-धर्म-दर्शन-व्यवहार-ज्योतिषादिभिः सम्बद्धः अकारादिक्रमिकशब्दैः ससन्दर्भैः तन्निर्वचनैश्च युक्तः इतिहासपुराणाश्रितो निर्वचनकोषः लक्ष्यते । कोशोऽयं कोष-भाषाशास्त्र-धर्म-विज्ञानेतिहासादिक्षेत्रेषु अध्येतॄणां कृते उपादेयोऽवश्यं भविष्यतीति नास्ति संशीतिलेशः । तत्रोदाहरणस्वरूपम् "अक्षर"शब्दस्य निर्वचनं पश्यामः । यथा -

अक्षरम् - (1) तदक्षरं न क्षरतीति विद्धि (महा.12.195.24)

(2) एतदक्षरमित्युक्तम् (महा. 12.291.35)

(3) एकत्वमक्षरं प्राहुः (महा. 12.293.47)

(4) न क्षीयते न क्षरति विद्यते न कदाचन (लि.पु.पू.82.25)

(5) न क्षरतीति लोकानि ऋतमक्षरमुच्यते ।
सत्यमक्षरमित्युक्तं प्रणवादिनमोऽन्तकम् ।। (लि.पु.उ.22.8)

(6) न क्षरतीति लोकेऽस्मिंस्ततो ह्यक्षरमुच्यते । (तत्रैव - 23.20)

(7) न क्षीयते न क्षरसे कल्पकोटिशतैरपि ।
तस्मात्त्वमक्षरत्वाच्च विष्णुरित्येव कीर्त्यते ।। (म.पु.248.39)

(8) न क्षीयते न क्षरति विकारप्रसृतन्तु तत् ।
अक्षरं तेन चाप्युप्तमक्षीणत्वात्तथैव च ।। (वा.पु.उ. 40.115)

(9) क्षराद्विरुद्धधर्मत्वादक्षरं ब्रह्म भण्यते । (श.क.) इति ।

(5) रामायण-महाभारतयोः शाब्दिकविववेचनम् - अयं ग्रन्थः दशाध्यायैः विभक्तः अस्ति । अस्मिन् ग्रन्थे वेदाङ्गस्य निरुक्तस्याधारेण वैदिकनिर्वचनानि पृष्ठभूमित्वेन स्वीकृत्य महाभारत-रामायणयोः प्राप्तानां निर्वचनानां विचारविमर्शः क्रियते । अत्र देव-देवयोनि-मानव-दैविक-भौतिकादिवर्गैः विभाजनं कृत्वा उभयग्रन्थयोः निर्वचनानि विस्तृततया प्रस्तूयन्ते । अन्ते निर्वचनकोषः प्रदत्तः ।

(6) नवोन्मेषः - राजस्थानविश्वविद्यालयस्य संस्कृतविभागः तथा डा.रामचन्द्रद्विवेदि इत्यनयोः तत्त्वावधानेन प्रो.शिवसागरत्रिपाठमहोदयस्य संयोजकत्वेन 1988 ख्रीष्टाब्दे समायोजितस्य अखिलभारतीयलेखसम्मेलनस्य शोधलेखानां सङ्कलनात्मकः अयं ग्रन्थः "नवोन्मेषः" भवति । ग्रन्थोऽयं राजस्थानसंस्कृतैकादमीद्वारा प्रकाशितः ।

(7) राष्ट्रालोकः (प्रथमो भागः) - स्वतन्त्रतायाः पूर्वं 1933 ख्रीष्टाब्दे 108 कारिकाविशिष्टस्य "राष्ट्रसञ्जीवनम्" इति काव्यस्य रचना श्रीमदमृतवाग्भवाचार्यैः विहितः । तस्य भाष्यमपि 1936 ख्रीष्टाब्दे कृतम् । भाष्यं तु अतीव दुष्प्राप्यमासीत् । महता प्रयासेन त्रिपाठिमहोदयाः नवदेहलीस्थात् श्रीराधाकृष्णसंस्थानात् सर्वादौ 36 कारिकाणां भाष्याणि स्वीकृत्य देवनागरीलिप्यां सम्पाद्य 1992 तमे ख्रीष्टाब्दे प्रकाशितवन्तः । अत्र 262 पुटानि वर्तन्ते । अस्य प्रकाशकः "देवनागर प्रकाशन, जयपुर" इति संस्था भवति ।

(8) राष्ट्रालोकः (द्वितीयभागः) - राष्ट्रालोकस्य द्वितीयभागः मूलकारिकाभिः साकं भाष्येण सह 450 पुटात्मकग्रन्थराशिना 1998 तमे ख्रीष्टाब्दे पुनः प्रकाशितः । समाज-शिक्षा-शासनसुव्यवस्थादिसन्दर्भे आचार्यस्य श्रीमदमृतवाग्भवाचार्यस्य विश्लेषणमत्र सार्वकालिकं सार्वभौमिकं च भवति । शैवसिद्धान्तः, राष्ट्रियसिद्धान्तश्चेति

उभयोर्मध्ये सामञ्जस्यं संस्थाप्य मुने: विचार: सर्वेषां कृते उपयोगी प्रतीयते । राष्ट्रम्, राष्ट्रभाषा, ग्राम्यशिक्षा, राष्ट्रियैकता, अखण्डता, सुस्पष्टसमुन्नतराष्ट्रिय-चिन्तदृष्टि: इत्यादिषु सन्दर्भेषु "राष्ट्रालोक:" महत्त्वपूर्णो भवति ।

(9) वेदान्तसार: - श्रीसदानन्दयोगीन्द्रप्रणीतस्य "वेदान्तसार:" इति ग्रन्थस्य छात्रोपयोगि-दृष्ट्या विश्लेषणं कृत्वा अयं ग्रन्थ: त्रिपाठिमहोदयेन प्रकाशित: । अत्र विषयोपन्यास: अतीव सरल:।

(10) गीताविज्ञानभाष्यम् - श्रीमद्भगवीता सर्वेषामपि जीवनदर्शनानाम् आध्यात्मिकताया: मूलभूतो भवति । अत्र अध्यात्मविद्या, अधियज्ञ:, अधीभुत: समग्रोऽपि ज्ञानसंग्रह: वर्तते । वेदविज्ञानप्रवर्तक: पण्डितमधुसूदन ओझामहोदय: अनया दृष्ट्या "गीताविज्ञानभाष्यम्" व्यरचयत् । अस्य ग्रन्थस्य रहस्यकाण्डस्य प्रकाशद्वय्या: सटिप्पणानुवादं कृत्वा सम्पाद्य त्रिपाठिमहोदयेन प्रकाशनं कृतम् ।

(11) कथाकल्प: - एकविंशशतके मानवस्य जीवनं यान्त्रिकं भौतिकञ्च अधिकं प्रतिभाति । अत्राध्यात्मिकताया: अवकाश: नास्ति । साहित्यपठने जनानां रुचि: न्यूनायते । अस्मिन् सन्दर्भे संस्कृतस्य स्थिति: अतीव शोचनीया प्रतिभाति । कालखण्डेऽस्मिन् प्रतिभावान् शिवसागरवर्य: बहुभाषाविज्ञ: "कथाकल्प:" इति रचनया समाजे जनानां संस्कृतं प्रति रुचिं वर्धयितुं प्रयत्नं विहितवान् । ग्रन्थोऽयं बहूनां लघुकथानां समूहात्मको भवति । अस्य ग्रन्थस्य कृते एव कविवरोऽयं राजस्थानसंस्कृत-अकादमीद्वारा, दिल्लीसंस्कृताकादमीद्वारा "महर्षिपुरस्कारेण", तथा च "बाला बक्ष शोध संस्थान, जयपुर" इति संस्थया प्रदत्तपुस्कारेण सम्बर्द्धित: । विषयवस्तुदृष्ट्या अत्र वैविध्यं परिलक्ष्यते । "कृष्णसर्पस्य चातुर्यम्", "ललितकलितफलितम्", "सुकन्या", "अशिक्षिता", "वन्ध्या", "पुस्तककृमि:", "हुतात्मसौहृदम्" इत्यादय: कथा: अत्र प्रमुखा: भवन्ति । कृष्णसर्पस्य चातुर्यम् इति कथां विहाय अन्यासु सप्तकथासु यथार्थता वर्तते ।

"ललितकलितफलितम्" इति कथायां ग्रामीणपरिवेशस्य निम्नवर्गीयनिर्धनपरिवारस्य वर्णना क्रियते । परिवारस्य वृद्ध: परिवारमुख्य: दीनहीनावस्थाकारणेन पुत्र्या: पुत्रस्य च शिक्षाव्यवस्थां कारयितुं समर्थो न भवति । अत: पुत्र्या: विवाहं कारयति । किन्तु सौभाग्यात् दयाराम: इति नेतु: कृपया पुत्र: उच्चशिक्षां सम्प्राप्य उच्चपदेऽभिषिक्तो भवति । पुत्र: ललित: धार्मिकवृत्तौ स्थित्वा अध्यापनाकार्यं स्वीकरोति । पुत्र: कलितश्च महत्त्वाकांक्षिरूपेण प्राशासनिकाधिकारी भवति । कलितस्य पत्नी अतीव सुविधाभोगिनी, ईर्ष्यालु:, धनलोलुपा च आसीत् । अत: तस्या: प्रेरणया "शेयरबाजार" इत्यत्र धनं नियोज्य पुन: दीन-हीनो भवति ।

"सुकन्या" इति कथायाम् एकस्य मध्यवर्गीयपरिवारस्य जीवनशैली वर्ण्यते । पिता कन्याविवाहचिन्तायां तथा मातृहीनपुत्रस्य चिन्तायां सुयोग्यवरस्य तथा वध्वा: अन्वेषणं करोति । तदत्र सम्यग्वर्ण्यते । प्रसङ्गत: भ्रतृजाया-ननान्दृप्रभृतीनां क्रियाकलापा: अपि मार्मिकतया अत्र वर्ण्यन्ते ।

"अशिक्षिता" इति कथा कथाकारेण उपाधिशिक्षावञ्चिताया:, व्यवहारविद्यानिपुणाया:, कर्मशील-लग्ननिष्ठ-परिश्रमशील-बुद्धमती-धीरगम्भीराया: "मनोरमाया:" चरित्रं पुरस्कृत्य रचिताऽस्ति । मनोरमाया: विवाह: दशमकक्ष्यायामनुत्तीर्णेन रामदत्तेन (रामुणा) साकं भवति । परन्तु असमये रामदत्तस्य भारवाहियानेन (ट्रक्) दुर्घटनायां स्वर्गवासो जायते । अस्यां विषमपरिस्थितौ पते: अग्रे पठनार्थमभिलाषां स्वीकृत्य मनोरमा सर्वं दायित्वं स्वयं गृह्णाति । रामदत्त: सम्यगधीत्य अग्रे प्राशासनिकसेवायां चित: उच्चाधिकारिपदे नियुज्यते । तत: पत्न्या अशिक्षितत्वं स: षोढुं न शक्नोति । तस्या: उपेक्षा क्रियते । तेन कारणेन मनोरमा व्यथिता सती स्वप्रयासेन एका प्रसिद्धा कथालेखिकारूपेण साहित्यसमाजे प्रतिष्ठिता रामदत्तस्य कृते शिक्षयति । अनया कथया कथाकार: त्रिपाठिमहोदय: पतिपीडितनारीणां मनोबलं वर्धयति ।

"वन्ध्या" इति कथायां मध्यवित्त-संयुक्तपरिवारस्य वध्वा: चित्रणं क्रियते । एषा वधू: परिवारजनै: पीड्यते । परिवारस्य मुख्य: सेवानिवृत्त:, अस्वस्थ:, धूम्रपान-मद्यपानासक्त: व्ययपरायण: आसीत् । देवर: क्रौधी कलहस्वभाव:, ननन्दाऽपि तथैव । पति: शिवेश: एव सुखदु:खसहयोगी आसीत् । वध्वा: नाम "सुफला" इति कविना प्रदत्तम् । एषा नि:सन्ताना इति हेतो: कथाया: मुख्यनायिकानाम्ना "वन्ध्या" इति नाम प्रदत्तम् ।

"पुस्तककृमि:" इति द्वयो: छात्रयो: कथाऽस्ति । तेषु एक: छात्र: सर्वदा पुस्तकेष्वेव लीनो भवति, अपर: अध्ययनेन साकं विविधासु सांस्कृतिककार्येषु अपि भागं गृह्णाति । परीक्षायां सर्वोच्चाङ्कान् सम्प्राप्यापि पुस्तककीटनाम्ना प्रसिद्धस्य छात्रस्य प्रतियोगिपरीक्षायां साक्षात्कारे विफलत्वं प्राप्यते । परन्तु महेश: इति सर्वगुणसम्पन्न: चयनित: प्रशासनिकाधिकारी भवति विदेशं च गच्छति । एकस्मिन् दिने स: तस्मिन्नेव कार्यालये पदाधिकारी भवति, यत्र पुस्तककीट: कार्यं कुर्वन्नासीत् ।

"हुतात्मसौरभम्" इति कथायां कश्मीरनिवासिन: मकबूलशेरवानी इति युवकस्य राष्ट्रप्रेमगाथा वर्ण्यते । अस्य चरित्रमेकाङ्किकारूपेण कविनानेन प्रस्तुतमस्ति ।

"कृष्णसर्पस्य चातुर्यम्" इति एका बालोपयोगिनी नीतिकथाऽस्ति । कथाया: प्रेरणा पञ्चतन्त्र-हितोपदेशयो: कविना सम्प्राप्ताऽस्ति । कथाकार: नवीनरूपेण कथा: प्रस्तौति । वृद्ध: कृष्णसर्प: स्ववाक्चातुर्येण भेकराजस्य मनसि विश्वासमुत्पाद्य बान्धवजनान् सुरक्षितस्थानं प्रति नेतुमुक्त्वा व्याजेन तेषां भक्षणं चकार । भेकराज: एकस्मिन् दिने तमनु गत्वा सत्यं ज्ञातवान् । तत: स्वमित्रेण नकुलेन तस्य संहारं कारितवान् । एवं प्रकारेण कथाकल्प: इति ग्रन्थाधारेण कथाकार: समसामयिकविषयाणां समस्यानाञ्चोपरि विचारविश्लेषणं चकार ।

(12) भ्रष्टायनम् - "भ्रष्टायनम्" इति काव्यं विंशतिसर्गात्मकं प्रबन्धकाव्यं भवति । काव्यस्यास्य प्रमुखोऽयं विषयो भवति भ्रष्टाचार: । अयं भ्रष्टाचार: अद्यतनीना विश्वव्यापी समस्या वर्तते । संस्कृतसाहित्येऽस्मिन् अस्य भ्रष्टाचारस्य काव्यमयी विवेचना कृताऽस्ति । अस्यां विवेचनायां ये उपविषया: स्वीकृता: ते कुत्रचित् मुक्तमिव प्रतीयन्ते । यतो हि तस्मिन् एकदेशीयता पलिलक्ष्यते । खण्डकाव्यस्यास्य लक्षणं भवति यत् - "खण्डकाव्यं भवेत्काव्यस्यैकदेशानुसारि च" (सा.द. - 6/32) । परन्तु अस्मिन् काव्ये बहुषु स्थलेषु स्वस्यां स्वस्मिन् सीम्नि प्रबन्धत्वमवलम्ब्यते । अत विषयात्मकता अवश्यं भवति, परन्तु वाण्या: अनन्ततताया: कारणात् विविधपक्षात्मकता एवं पूर्वापरसापेक्षताऽपि दृश्यते । अत: स्वरूप-शैली-कलेवरादिदृष्ट्या दं काव्यं विस्तृते सत्यपि प्रबन्धकाव्यमिति मन्यते । पुस्तकमिदं भाषाद्वये प्रकाशितमस्ति । अर्थात् अस्मिन् वामभागे संस्कृतपद्यम् एवं च दक्षिणभागे तस्य हिन्द्यनुवादो दत्तोऽस्ति । सर्गान्ते विविधानां छन्दसां प्रयोग: दरीदृश्यते । समग्ररचनायां सुस्पष्टताया: प्रभावात्मकताया: तथा प्रवाहात्मकतायाश्च उत्कृष्टत्वं प्रतिपादयितुम् अनुष्टुभ: छन्दस: प्रयोग: कृतोऽस्ति । येन क्षणिकं तथा जनजीवनसम्बद्धविषयाणां कृते सर्वदा उपयुक्तं छन्द इति आचार्येण क्षेमेन्द्रेण उक्तमस्ति यत् -

शास्त्रं कुर्यात् प्रयत्नेन प्रसन्नार्थमनुष्टुभा ।
येन सर्वोपकाराय याति सुस्पष्टसेतुताम् ।।

भ्रष्टायनमिति पुस्तकस्य प्रथमसर्गे विघ्नविनाशार्थं व्यङ्ग्यशैल्या भ्रष्टदेवस्य कृते प्रणामाञ्जलि: समर्पितोऽस्ति । द्वितीयसर्गे भ्रष्टाचारस्य परिभाषा, क्षेत्रं तथा र्ततानां समस्यानामपुरि आलोचनं कृतमस्ति । तृतीये सर्गे भ्रष्टाचारस्य तथा दुराचारिणां स्वरूपम्, इतिहासहेतु:, परिणामादीनां वर्णनं कृतं वर्तते । चतुर्थे सर्गे भ्रष्टाचारिणां तथा दुराचारिणां प्रवृत्ति:, प्रकृति:, गुणा: कार्यशैलीनां च स्थिति: स्पष्टतया प्रतिपादितम् । पञ्चमे सर्गे भ्रष्टाचारस्य प्रबन्धकानां तथा पोषकतत्त्वानां निर्देश: वर्तते । षष्ठे सर्गे लता, प्रवाह:, दानव:, क्षुद्रजीवानां स्पष्टबोधनं दत्तमस्ति । सप्तमे सर्गे उत्कोचस्य विविधानां

पक्षाणां विषमस्थितिश्च जागरिता वर्तते । अष्टमे सर्गे व्यक्तेः, समाजस्य, देशस्य, मानवतायाश्च उपरि भ्रष्टाचारस्य प्रभावाणां दिग्दर्शनं कृतमस्ति । नवमे, दशमे, एकादशे द्वादशे सर्गे च नैके भ्रष्टाचारसम्बद्धाः विषयाः प्रतिपादिताः वर्तन्ते । अत्र प्रजातन्त्र–राजनीति–प्रशासन–नेतृवर्गेषु च प्रसारितभ्रष्टाचारविषये दृष्टिपातः कृतोऽस्ति । त्रयोदशे चतुर्दशे च सर्गे स्थालिपुलाक–न्यायेन कतिपयविभागेषु प्रचलितानां भ्रष्टाचाराणां सङ्केतः प्रदत्तोऽस्ति । पञ्चदशे सर्गे भारतीयार्थ–व्यवस्थायाः उपरि भ्रष्टाचारस्य प्रभावः परिलक्षितः वर्तते । षोडशे सर्गे भ्रष्टाचारप्रभावितेषु देशविदेशविषयेषु चर्चा क्रियते । सप्तदशे सर्गे भ्रष्टाचारस्य नियन्त्रणोपायविषये समुचितं वर्णनमस्ति । अष्टादशे सर्गे भ्रष्टाचारनिवारणोपायाः वर्णिताः सन्ति । एकोनविंशतितमे सर्गे तदर्थं दण्डविधान–व्यवस्थाविषयाः चर्चितास्सन्ति । अन्तिमे विंशतौ सर्गे भ्रष्टाचारस्योपरि उपसंहारः विद्यते ।

अद्यतनसमये भ्रष्टाचारः अन्ताराष्ट्रियसमस्यारूपेण समग्रपृथिव्याः ग्रासं करोति । भारतवर्षेऽस्मिन् प्रत्येकस्मिन् क्षेत्रे तस्य प्रभावः दरीदृश्यते । अस्मिन् संसारे दृश्यते यत् – ये जनाः भ्रष्टाचारम्, आप्नुवन्ति ते सुखेन जीवन्ति परन्तु ये जनाः सत्यमार्गं तथा भ्रष्टाचारमुक्तं मार्गं गृह्णन्ति ते दुःखं प्राप्नवुन्ति ।

पूर्वं नीतिशास्त्रं तथा धर्मपरकग्रन्थाः जनान् उपदिशन्ति स्म । येन जनाः भ्रष्टाचारपन्थानं त्यजन्ति स्म । परन्तु अधुना उपदेष्टारः नेतारश्च उपदेशं ददति, परं स्वयं कुकर्मसु लिप्ताः भवन्ति । अतः समाजस्योपरि तेषां प्रभावो न पतति ।

भ्रष्टाचारवत् ज्वलन्तसमस्या तथा तद्विषयकचिन्ताविषयाः साहित्यकाराः अपि जानन्ति । अतः तस्य प्रवृत्ति–स्थिति–परिणामादीन् स्वीकृत्य इतस्ततः विविधासु भाषासु प्रकीर्णतया लिखितमस्ति । एवमेव जयपुरतः प्रकाशितसंस्कृतपत्रिकायां भारत्यां प्रकाशितमस्ति यत् –

भ्रष्टमदो भ्रष्टमिदं भ्रष्टाद् भ्रष्टमुदच्यते ।
भ्रष्टस्य भ्रष्टमादाय भ्रष्टमेवावशिष्यते ।।

एवं रूपेण भ्रष्टायनम् इति प्रबन्धकाव्यस्य सारः सम्यग्रूपेण वर्णितोऽस्ति। ।

(13) शतकपञ्चकम् – डा.त्रिपाठिमहोदयैः पञ्च शतककाव्यानि प्रणीतानि । यथा – "स्वातन्त्र्यस्वर्णजयन्तीशतकम्", "आधुनिकालापशतकम्", "भ्रष्टताशतकम्", "मानवताशतकम्", "प्रकीर्णशतकं" चेति ।

(14) कथाकृतिः – एषः कथासंग्रहः हिन्दीभाषायां रचितानां लघुकथानामाकरोऽस्ति ।

एवं प्रकारेण प्रो.शिवसागरत्रिपाठिमहोदयैः "संस्कृत काव्य कल्लोलिनी", "आचार्य विद्यासागर ग्रन्थावली परिशीलन", "श्रीरामचन्द्रायणे सुन्दरकाण्डम्", "आचार्यप्रज्ञा", "पूजापद्धतिः", "वीर काव्यों में उपलब्ध निर्वचनों का अध्ययन", "संवीक्षा", "ललितायनम्" (अभिनन्दग्रन्थः), "भीष्मावतार सन्त सैन चरित", "स्वातन्त्र्यपञ्चाशिका", "सुबोधपूजापद्धतिः", इत्यादीनां पत्रिकाणां ग्रन्थानाञ्च रचयितृरूपेण प्रसिद्धोऽस्ति । एतेषु सर्वेषु अपि ग्रन्थेषु काव्येषु वा "भ्रष्टाचारसप्तशती" इति काव्यस्य समीक्षा अस्य शोधप्रबन्धस्य प्रमुखं लक्ष्यं भवति । अस्य विशिष्टतया कथावस्तुनः परिचयः अग्रिमाध्यायेषु क्रियते ।

– टिप्पणी –

1. प्राणाहूतिः, 13
2. तत्रैव – 14
3. तत्रैव – 31
4. तत्रैव – 24

सहायकर्गन्थसूची

1. भ्रष्टाचारसप्तशती – डा.शिवसागरत्रिपाठी, जगदीशसंस्कृतपुस्तकालयः, झालानियों का रास्ता, किशनपोल बाजार, जयपुरम्, राजस्थानम् । संस्करणम् – 2005 ।

2. शिवायनम् – महामहोपाध्याय आचार्य डॉ.शिवसागरत्रिपाठी अभिनन्दन ग्रन्थ, सम्पादकः – डॉ.पी.सी.जैन, रूपाङ्कनं मुद्रण् – कुमार एण्ड कम्पनी, जयपुरम् ।